# Naganatha Mahima Varnanam

# નાગનાથમહિમવર્ણનમ્

## Document Information

Text title : Naganatha Mahima Varnanam

File name : nAganAthamahimavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan, Rajani Arjun Shankar

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 17| 1-39||

Latest update : February 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 18, 2025

*sanskritdocuments.org*

Naganatha Mahima Varnanam

# નાગનાથમહિમવર્ણનમ્

ઈશ્વરઃ -

આવણ્ઢ(વટ્ટ)કં મહાપુણ્યં ક્ષેત્રમસ્ત્યેકમમ્બિકે ।
નાગનાથાહ્વયં લિઙ્ગં મમાસ્તિ ભુવનેશ્વરિ ॥ ૧॥

તત્રત્યસિકતાઃ સર્વા લિઙ્ગરૂપાશ્ચ કેવલમ્ ।
તત્ર સન્તિ મહાશૈવા નાગનાથાર્ચને રતાઃ ॥ ૨॥

ભસ્મરુદ્રાક્ષસમ્પન્નાઃ શિવધ્યાનપરાયણાઃ ।
રુદ્રાવર્તનશીલાશ્ચ રુદ્રલિઙ્ગૈકપૂજકાઃ ॥ ૩॥

મન્નામનિરતા નિત્યમન્યનામપરાઙ્મુખાઃ ।
મલ્લિઙ્ગાલોચનેનૈવ તેષાં પ્રીતિરહર્નિશમ્ ॥ ૪॥

કામુકઃ કામિનીં દૃષ્ટ્વા યથા પ્રીતો ભવેચ્છિવે ।
મમ લિઙ્ગં તથા શૈવા બિલ્વસમ્પૂજિતં મુદા ॥ ૫॥

નાગનાથં સ્તુવન્ત્યેવ વીક્ષન્તિ પ્રણમન્તિ ચ ।
વસન્તિ તત્ર મુનયો વિનયોજ્જ્વલવિગ્રહાઃ ॥ ૬॥

નાગનાથં મહાદેવં પૂજયન્તિ ગણેશ્વરઃ ।
નાગકુણ્ડમિતિ ખ્યાતં પાતાલવિવરં મહત્ ॥ ૭॥

તન્માર્ગેણ સમાગત્ય શેષોઽનન્તફણામુખઃ ।
સ્વમૌલિરત્નજાલૈર્માં પૂજયત્યેવ શઙ્કરિ ॥ ૮॥

સહસ્રવદનેનાપિ રુદ્રસૂક્તૈર્મહેશ્વરમ્ ।
માં સ્તૌતિ ભક્ત્યા નિયતં સ મે ગણવરોત્તમઃ ॥ ૯॥

તસ્મિન્પ્રીતિર્મમાત્યન્તં કુમારે ગણપે યથા ।
ત્વયિ સર્વામરેશાનિ તથા શૈવોઽયમમ્બિકે ॥ ૧૦॥

શૈવ શરીરં દેવેશિ મદાલયમનુત્તમમ્ ।

તસ્યૈવ હૃદયામ્ભોજગર્ભાગારે મનોરમે ॥ ૧૧॥

નીવારશૂકસદૃશલિઙ્ગાકારોઽસ્મિ શઙ્કરિ ।
તદ્દેહં યેન સમ્પૂજ્ય સ્થિતં સોઽપિ મદર્ચકઃ ॥ ૧૨॥

શૈવસમ્પૂજનાદેવ મમ પ્રીતિર્મહેશ્વરિ ।
સ્વતન્ત્રસ્ય મહેશસ્ય સર્વમ્ભાગ્યયુતસ્ય મે ॥ ૧૩॥

કિં નામ ક્રિયતે દેવિ પૂજયા વા સુમૈઃ શિવે ।
લોકસંરક્ષણાર્થાય લિઙ્ગે ગૃહ્ણામિ પૂજનમ્ ॥ ૧૪॥

ભક્તૈર્મમ કૃતા પૂજા તુષ્ટ્યૈ ભવતિ શોભને ।
સૂક્ષ્મં મદીયં લિઙ્ગં તત્પશ્યન્તિ શિવયોગિનઃ ॥ ૧૫॥

લિઙ્ગમેતન્મહાદેવિ જ્ઞાનહીનો ન પશ્યતિ ।
નત્વા તં વેદવાક્યૈશ્ચ જાયતે મત્કૃપાબલાત્ ॥ ૧૬॥

કથમન્યેઽપિ પશ્યન્તિ નાનાકામૈકગામિનઃ ।
સખણ્ડાન્યન્યલિઙ્ગાનિ ચાખણ્ડં વ્યાપકં મમ ॥ ૧૭॥

કસ્યચિદ્ભૂરિભાગ્યેન સભાગ્યસ્યૈવ શઙ્કરિ ।
નિર્ભાગ્યાનાં મહાદેવિ તજ્જ્ઞાનં નૈવ જાયતે ॥ ૧૮॥

મત્કૃપામાત્રમેકં હિ શૈવગાત્રં ગિરીન્દ્રજે ।
શૈવઃ શિવૈકશરણઃ શિવલિઙ્ગાર્ચનપ્રિયઃ ॥ ૧૯॥

શિવક્ષેત્રરતો નિત્યં શ્રીરુદ્રજપતત્પરઃ ।
ભસ્મરુદ્રાક્ષસમ્પન્નઃ ષડક્ષરજપાદરઃ ॥ ૨૦॥

શૈવસમ્પૂજકો નિત્યં શિવનૈવેદ્યભોજનઃ ।
મન્નામપરમો નિત્યં ત્યક્ત્વાઽન્યસુરકીર્તનમ્ ॥ ૨૧॥

શિવ શમ્ભો મહાદેવ પ્રસીદેતિ વદન્મુદા ।
આપાદમસ્તકં ભસ્મ સમુદ્ધૂલ્ય યથાવિધિ ॥ ૨૨॥

રુદ્રાવર્તનશીલો યઃ સ મે ભક્તઃ સદામ્બિકે ।
વેદવેદાન્તવાક્યૈશ્ચ બોધજ્ઞાનપરઃ સદા ॥ ૨૩॥

તસ્યૈવ જાયતે જ્ઞાનં નાન્યથા કર્મકોટિભિઃ ।
અસત્યમિતિ તત્સર્વં ત્રૈગુણ્યં પરમેશ્વરિ ॥ ૨૪॥

આવિધકાનિ શાસ્ત્રાણિ મિથ્યાજ્ઞાનપ્રદાનિ હિ ।
મચ્છાસ્ત્રં સત્યમેવેદં બ્રહ્મૈવેદમિતિ શ્રુતિઃ ॥ ૨૫॥

આત્મૈવેદમિદં દૃશ્યં તસ્મિન્ જગદિદં મૃષા ।
જગત્પ્રરોચનાશાસ્ત્રં સત્યત્વે કલ્પયિષ્યતે ॥ ૨૬॥

મૂઢાનાં સ્વર્ગનરકપુણ્યપાપાદિવાસનાઃ ।
ત્રૈગુણ્યવિષયો વેદઃ સ્વાધિકારાનુરૂપતઃ ॥ ૨૭॥

પુણ્યપાપફલં ભોક્તું વ્યાવહારિકકલ્પનૈઃ ।
સર્વં તરતિ વૈ શોકં શૈવો મત્પાદસંશ્રયઃ ॥ ૨૮॥

અત્રેતિહાસં વક્ષ્યામિ નાગનાથસ્ય વૈભવમ્ ।
મમ લિઙ્ગાત્મનો દેવિ શૃણુ શ્રવણભૂષણમ્ ॥ ૨૯॥

સ ચક્ષુઃશ્રવસાં રાજા શેષોઽશેષગુણૈર્યુતઃ ।
બ્રહ્મણા સમનુજ્ઞાતો ભૂમિસન્ધારણાય વૈ ॥ ૩૦॥

દૃષ્ટ્વા સપર્વતવનાં સાબ્ધિદ્વીપોરુપત્તનામ્ ।
વિષાદમગમત્ તીવ્રં શેષો માં શરણં ગતઃ ॥ ૩૧॥

આવટ્ટકમિદં ક્ષેત્રં પ્રાપ્ય કુણ્ડં તથાઽકરોત્ ।
નાગકુણ્ડમિતિ ખ્યાતં તત્તીરે તપસિ સ્થિતઃ ॥ ૩૨॥

સ્વપુચ્છવેષ્ટનૈર્ભૂમિમધિષ્ઠાયોચ્છ્રયન્ ફણાઃ ।
માં વિલોક્ય મહાદેવિ ભસ્મરુદ્રાક્ષભૂષણઃ ॥ ૩૩॥

રુદ્રમાવર્તયન્તસ્થૌ શરદાં શતમુત્તમમ્ ।
લિઙ્ગં સુચક્ષુષાં પશ્યન્ચક્ષુષાં સંશ્રવન્કથાઃ ॥ ૩૪॥

શેષઃ પવનભુઙ્નિત્યં તપસાઽશોષયત્ તનુમ્ ।
ગ્રીષ્મે કુસરિતં ભાનુશ્ચણ્ડભાનુકરૈર્યથા ॥ ૩૫॥

બ્રહ્માદ્યા દેવતાઃ સર્વા દ્રષ્ટું તં તપસિ સ્થિતમ્ ।
સમાગતાસ્તદા દેવિ તાન્ સર્વાન્ કુણ્ડલીશ્વરઃ ॥ ૩૬॥

અગણય્ય તદા તસ્થૌ માં ધ્યાયન્ લિઙ્ગરૂપિણમ્ ।
તસ્ય તદ્દાર્ઢ્યમાજ્ઞાય હ્યદદં દર્શનં શિવે ॥ ૩૭॥

દૃષ્ટ્વા માં સ્વફણાભિશ્ચ નનામ શિરસા શિવમ્ ।
સહસ્રવદનેનાપિ નામ્નાં સાહસ્રતઃ શિવે ॥ ૩૮॥

અપૂજયદ્બિલ્વપત્રૈઃ તુષ્ટાવ જગદીશ્વરમ્ ॥ ૩૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે નાગનાથમહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૧૭। ૧-૩૯॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 17. 1-39..

Notes:
Shiva describes to Gauri, the glory and merits of worshipping Him as Naganatha નાગનાથ (that is mentioned as a Jyotirlinga જ્યોતિર્લિઙ્ગ that is) located near Nagakunda in Avandha (Avatta) Shiva Kshetra.

The shloka numbers are maintained per the source text.

Proofread by Ruma Dewan, Rajani Arjun Shankar

*Naganatha Mahima Varnanam*
pdf was typeset on February 18, 2025

Please send corrections to *sanskrit@cheerful.com*